# श्रीसरस्वतीमन्त्रप्रयोग:

अथ विनियोग: :-

ॐ प्रणो देवीत्यस्य मन्त्रस्य भरद्वाज ऋषि:, गायत्री छन्द:, श्रीसरस्वती देवता, अं बीजं, उं शक्ति:, मं कीलकम् , परमपुरुषार्थसिद्धये जपे विनियोग:।

अथ ऋष्यादिन्यास: :-

ॐ प्रणो देवीत्यस्य मन्त्रस्य भरद्वाजर्षये नम: - शिरसि, ॐ श्री गायत्रीछन्दये नम: - मुखे, ॐ श्री सरस्वती देवतायै नम: -हृदये, ॐ अं बीजाय नम: -गुह्ये, ॐ उं शक्तये नम: -पादयो:, ॐ मं कीलकाय नम: - नाभौ, परमपुरुषार्थसिद्धये जपे विनियोगाय नम: - सर्वांगे।

| मन्त्रा: | अथ करन्यास: | अथ हृदयादिन्यास: |
|---|---|---|
| ॐ ॐ नम: | अंगुष्ठाभ्यां नम: | हृदयाय नम: |
| ॐ प्रणो नम: | तर्जनीभ्यां नम: | शिरसे स्वाहा |
| ॐ देवी नम: | मध्यमाभ्यां नम: | शिखायै वषट् |
| ॐ सरस्वती नम: | अनामिकाभ्यां नम: | कवचाय हुम् |
| ॐ वाजेभिर्वाजिनीवती नम: | कनिष्ठिकाभ्यां नम: | नेत्रत्रयाय वौषट् |
| ॐ धीनामवित्र्यवतु नम: | करतलकरपृष्ठाभ्यां नम: | अस्त्राय फट् |

ॐ भूर्भुव:स्वरोमिति दिग्बन्ध:।

अथ ध्यानम् :-

या वेदान्तार्थतत्त्वैक - स्वरूपा परमार्थत:।
नामरूपात्मना व्यक्ता सा मां पातु सरस्वती।।

न्यूनतम पंचोपचारपूजन करें -

ॐ लं पृथिवीतत्त्वात्मिकायै महासरस्वत्यै गन्धं परिकल्पयामि पूजयामि समर्पयामि,
ॐ हं आकाशतत्त्वात्मिकायै महासरस्वत्यै पुष्पं परिकल्पयामि पूजयामि समर्पयामि,
ॐ यं वायुतत्त्वात्मिकायै महासरस्वत्यै धूपं परिकल्पयामि पूजयामि समर्पयामि,
ॐ रं वह्नितत्त्वात्मिकायै महासरस्वत्यै दीपं परिकल्पयामि पूजयामि समर्पयामि,
ॐ वं जलतत्त्वात्मिकायै महासरस्वत्यै नैवेद्यं परिकल्पयामि पूजयामि समर्पयामि,
ॐ सं सर्वतत्त्वात्मिकायै महासरस्वत्यै ताम्बूलादिसर्वोपचारान् परिकल्पयामि पूजयामि समर्पयामि।

तत्पश्चात् यथाशक्ति जप करे -

''ॐ प्रणो देवी सरस्वती वाजेभिर्वाजिनीवती। धीनामवित्र्यवतु ''

इस चतुर्विंशत्यक्षरीमन्त्र का जप करके सरस्वतीस्तोत्र का पाठ कर भगवती को समर्पित करे।

Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM